# ॥ श्रीवल्लीभुवनेश्वर्यष्टकम् ॥

श्रीचित्रापुरवासिनीं वरभवानीशङ्करत्वप्रदाम्
ओतप्रोतशिवाऽन्वितां गुरुमयीं गाम्भीर्यसन्तोषधाम् ।
हृद्गुह्याङ्कुरकल्पितं गुरुमतं स्रोतायते तां सुधां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥ १ ॥

चिन्मुद्राऽङ्कितदक्षिणाऽस्यनिहितां श्रीभाष्यकारश्रियं
तां हस्तामलकप्रबोधनकरीं क्षेत्रे स्थितां मातृकाम् ।
श्रीवल्ल्युद्भवपुष्पगन्धलहरीं सारस्वतत्रायिकां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥ २ ॥

श्रीविद्योदितकौमुदीरसभरां कारुण्यरूपाऽत्मिकां
मूर्तीभूय सदा स्थितां गुरुपरिज्ञानाश्रमाऽऽश्वासनाम् ।
सान्निध्याऽङ्गणशिष्यरक्षणकरीं वात्सल्यसाराऽऽस्पदां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥ ३ ॥

तन्वीं रक्तनवाऽर्कवर्णसदृशीं खण्डेन्दुसम्मण्डितां
पीनोत्तुङ्गकुचद्वयीं कुटिकटीं त्र्यक्षां सदा सुस्मिताम् ।
पाशाऽभीतिवरैश्वराऽङ्कुशधरां श्रीपर्णपादां परां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥ ४ ॥

© Shrī Chitrāpur Ma<u>th</u>. All rights reserved
Shrī Chitrāpur Ma<u>th</u>, Shirālī, Uttara Kannaḍa, Karnāṭaka - 581354, India
www.chitrapurmath.net

श्रीमच्छङ्करसद्गुरुर्गणपतिर्वातात्मजः क्षेत्रपः
प्रासादे विलसन्ति भूरि सदये नित्यस्थिते ह्रींमयि ।
युष्मत् स्नेहकटाक्षसौम्यकिरणा रक्षन्ति दोग्ध्रीकुलं
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥५॥

गोश्रीं वत्ससुरक्षिणीं मठगृहे भक्तप्रजाऽऽकर्षिणीं
यात्रादिव्यकरीं विमर्शकलया तां साधके संस्थिताम् ।
प्रायश्चित्तजपाऽऽदिकर्मकनितां ज्ञानेश्वरीमम्बिकां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥६॥

श्रीसारस्वतगेयपेयजननीं ज्ञानाऽऽदिविद्याप्रदां
लोके भक्तसुगुप्तितारणकरीं कार्पण्यदोषाऽपहाम् ।
आर्यत्वप्रविकासलासनकरीं हृत्पद्मविद्युत्प्रभां
श्रीवल्लीं भुवनेश्वरीं शिवमयीम्-ऐश्वर्यदां तां भजे ॥७॥

क्षुद्रा मे भुवनेश्वरि स्तुतिकथा किं वा मुखे ते स्मितं
याऽसि त्वं पदवर्णवाक्यजननी वर्णैः कथं वर्ण्यताम् ।
वासस्ते मम मानसे गुरुकृपे नित्यं भवेत् पावनि
नाऽन्या मे भुवनेश्वरि प्रशमिका नाऽन्या गतिर्ह्रींमयि॥८॥

© Shrī Chitrāpur Math. All rights reserved
Shrī Chitrāpur Math, Shirālī, Uttara Kannaḍa, Karnāṭaka - 581354, India
www.chitrapurmath.net

अम्बा मोहिनी देवता त्रिभुवनी आनन्दसन्दायिनि
वाणी पल्लवपाणि-वेणु-मुरली-गानप्रिया लोलिनी ।
कल्याणी उडुराजबिम्बवदना धूम्राक्षसंहारिणी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥२॥

© Shrī Chitrāpur Ma<u>th</u>. All rights reserved
Shrī Chitrāpur Math, Shirālī, Uttara Kannaḍa, Karnāṭaka - 581354, India
www.chitrapurmath.net